# 3

# वेदान्तनये जीवः

**डॉ त्रिपुरारि कुमार ठाकुर**
असिस्टेंट प्रोफेसर,संस्कृत-विभाग
श्री सुदृष्टि बाबा स्नातकोत्तर महाविद्यालय, रानीगंज, बलिया
Email: tripuraridu@gmail.com

**ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।**
**अनेन वेद्यं सच्छास्त्रमिति वेदान्तडिण्डिमः।।**

अत्र शुकरहस्योपनिषदःएवकारपरम्परया जीवत्वावच्छेदेन ब्रह्मत्वायोगव्यवच्छेदसंसिद्धावादौ कस्तावज्जीवोऽत्र व्युत्पत्तिशरणम्।प्राणधारणार्थकात् जीवधातोः जीवतीतिविग्रहे आहोस्वित् जीवनम् इति विग्रहे धञि[1], कप्रत्यये[2] कृते सति जीवपदस्य भवति निष्पत्तिः । इदं जीवपदमस्ति प्राणिनि वृत्तौ वृक्षभेदे वृहस्पतादौ[3] इत्यदिष्वर्थेषु शक्तम् । अस्य दार्शनिकः भावः अस्ति विशिष्टः तच्च प्रतिदर्शनतन्त्रम्पार्थक्यमावहति । तस्य स्वरूपे परिमाणे वैशिष्ट्ये वैविध्यमङ्गीकरोति । एतादृशं वैशिष्ट्यं मनसि आश्रित्य अनुसन्धानमार्गे विषयोऽयं“वेदान्तनये जीवः”समुपस्थाप्यते विशिष्यानुवेदान्तम् ।

---

[1] पा. सू. 3.3.18

[2] पा. सू. 3.1.135

[3] अमरकोषः -2.9.119 उपरि रामाश्रमी टीका


Volume 4, Issue 2, 2025, p. 26-48, ISSN 2583-6331
©Indira Gandhi National Open University

**शोधपत्रस्य उद्देश्यानि –**

1. जीवप्रत्ययस्यावधारणा समायास्यतीति ।
2. तत्स्वरूपवैलक्षण्यमधिगतं भविष्यति ।
3. अस्य यथातथ्यात्मको भावः अधिगम्यते ।
4. अस्य पदार्थस्य अवस्थाः अनुशील्यते ।
5. अस्य परिणामविशेषः अनुसंधीयते ।
6. ईश्वरेण ब्रह्मणा वा साङ्गत्यमधिक्रियते ।
7. दार्शनिकदृष्ट्या जीवः कः अयमंशः विचार्यते ।
8. जीवस्य जीवनक्रमः क्रमीक्रियते ।
9. ईश्वरपदार्थयोः साधकः जीवः अस्ति वा न वेति भावः परिशील्यते ।

एतानि प्रमुखोद्देश्यान्यधिकृत्यायं विषयः विमृश्यते ।

**[क] जीवसम्प्रत्ययः** –ननु कस्तावज्जीवः इति प्रश्नोत्तरे श्रीमदाद्यशङ्करवचनम्अनुनीयते यत् – “अस्ति आत्मा जीवाख्यः, शरीरेन्द्रियपञ्चराध्यक्षः, कर्मफलसम्बन्धीति” ।[4] अत्रात्मनः जीवत्वम्, शरीरेन्द्रियपञ्जराध्यक्षत्वम्, कर्मफल सम्बन्धित्वञ्चेति वैशिष्ट्यमायाति यच्च च जीवत्वसामानाधिकरण्यमाप्नोति तेन शरीरान्तः करणावच्छिन्नत्वे सति कर्मफलसम्बन्धित्वे सति जीवत्वविशिष्टः जीवः तदात्माख्येति उपपद्यते । अनेनास्य जीवस्य कर्तृत्वम्, फलभोक्तृत्वञ्च सूपपद्यते। जीवोऽयमवभासकत्वमपि स्वीकरोत्यत्राचार्याः पञ्चदशीकाराः[5]- अहङ्कारः प्रभुः सभ्या विषया नर्तकी मतिः । तालादिधारीण्यक्षाणि दीपः साक्ष्यवभावः । अनेन पञ्जराध्यक्षत्वमुपपद्यते । वस्तुतः शरीरस्य अन्तः पदार्थाः ये सन्ति तेषामुपस्थापकत्वम् अस्य जीवस्येत्यन्वेति । अन्तः करणस्वरूपा या बुद्धिः तन्मर्यादया जीवत्वमेति । तत्सम्बन्धस्य मिथ्यात्वम् अस्तीति विवेकचूडामणिकाराशयः तेन अस्य जीवस्य वैलक्षण्यमायाति तथा च[6] -

---

[4] शां. भा. 1.3.17 उपरि

[5] पञ्चदशी 10/140

[6] विवेकचूडामणिः - 202-3


©Indira Gandhi National Open University

यद्बुद्ध्युपाधिसम्बन्धात् परिकल्पितमात्मनि । जीवत्वं न ततोऽन्यत्तु स्वरूपेण विलक्षणम् । अत्र अस्य यद्यन्तःकरणध्यक्षत्वमुपपद्यते तर्हि जगद्धारकत्वमाप्यायाति तेन येन इदं जगत् धार्यते सः जीवः इत्यर्थोऽप्यायाति ।[7] अत्रास्य जीवस्य शरीक्षापेक्षया ज्ञानेन्द्रिय-कर्मेन्द्रियाध्यक्षत्वम् उपपद्यते । अनेन उभयविध-इन्द्रियेन अयं संसारः आत्मसात्क्रियते । सन्दर्भेऽस्मिन् माण्डूक्यकारिकाकारस्य इदम्पद्यमवधेयम्[8] -

"जीवं कल्पयते पूर्वं ततो भावान् पृथग्विधान् इति" अत्र जीवहेतुकाः भावाः इत्यन्वयः ज्ञेयः । अनेन पदार्थाध्यक्षत्वमपि सम्पद्यते । अपि च तुरीयत्वमप्युपपद्यते तेन तत्त्वमसि इत्यादिमहावाक्यानामन्वयो भवति अत्र अयं जीवः स्वप्रकाशकः पदार्थोद्भावकः, अन्तःकरणोद्दीपक वर्तते । अस्य विविधास्पदे वैविध्यमुपपद्यते अत एवास्य प्रवचनालभ्यत्वं गम्यते । परमत्र ब्रह्म उपाधिसमन्वितत्वात् वाङमनः प्राण समुदायान्वितं भवति तदा ब्रह्म एव जीवः ।[9] अवस्थात्रयावच्छिन्नमप्यस्यान्वेति । अस्य जीवस्य प्रत्यये चैतन्यस्यापि समवधारणा समायाति । यदास्य अन्तःकरण- साङ्गत्यम्भवति तदा जीवत्वम्प्रकीर्त्यते । ईश्वरचैतन्यबिम्बप्रतिबिम्बित्वम् अपि जीवत्वम्। अत्राच्छाद्याच्छादकभावः ईश्वरजीवयोः संगतो भवति यत्राच्छादकः ईश्वरः आच्छाद्यः च जीवः । भवतु जीवः चैतन्यान्वितः ईश्वरव्यतिरिक्तः अज्ञानावच्छिन्नः बिम्बादिप्रतिबिम्बितः । रामानुजोऽप्यस्य चैतन्यतत्त्वस्यप्राधान्यम्प्रदाय आह – "तत्र चिच्छब्दवाच्याः जीवात्मनः परमात्मनः साकाशाद् भिन्नाः नित्याश्चः"[10] अत्र चित् पदार्थस्य वैशिष्ट्य हि – "अन्तर्यामित्वावच्छिन्नत्वमभ्युपेति" ।[11] अनेन तस्य वासुदेवस्य प्रेरकत्वम् अपि च जीवस्य प्रेर्यत्वम् उपपद्यते । अत्र आर्हतैः अपि बोध त्वमादाय जीवस्यास्यायैम्भावः समुपस्थापितः – "सकल जीव साधारणं चैतन्यं उपशमक्षयोपशमवशात् औपशमिकक्षयात्मक भावेन कर्मोदयवशात् कलुषान्याकारेण

[7] गीता - 7/4-5

[8] मा. का. वैतथ्य प्र. 16

[9] न्यायकोशः - जीवव्याख्यानम् पृ. सं. 296

[10]माध्वाचार्यरचितः सर्व द. सं. [स. दर्शनम्] पृ.सं. 189, उ. रां. श. ऋषि, चौ. वि.

[11]तथैव पृ.सं. 194, श्लोक सं. 16- 2 चरण


©Indira Gandhi National Open University

परिणतजीवपर्याय विवक्षायां जीवस्वरूपं भवति”[12] न्यायवैशेषिक मतसम्मतसंग्रहग्रन्थपरकं वचनमत्र बन्धमोक्षसाक्षेत्वम् आयाति ।[13] केचित्तु अनित्यज्ञानाश्रयः जीवः । अस्तिकायान्वितोऽयं जीवः इति जीव प्रत्ययावधारणा ।

ननु उपरि जीवान्विताः याः अवधारणाः वर्तन्ते ताः सर्वाः यदि सूक्ष्मेक्षिकया विवेच्यन्ते ततर्हि शरीरान्विततत्वेन बन्धस्य मोक्षस्य अस्तिकायस्य संगतिरायाति । अत्र इन्द्रियपदेन चैतन्यसंग्रहः, बोधसंग्रहः ग्राह्यः । कर्मफलसम्बन्धित्वेन बन्धमोक्षत्वाभ्यामिह ईश्वव्यतिरिक्ततत्वम् आयाति एतावता इदं वचनमत्र ऊह्यं यत् एकैकं पक्षमाश्रित्य जीवप्रत्ययस्य या अवधारणा सा श्रीमदाद्यप्रत्ययान्वितेति मदीयोऽभिप्रायः । अत्र प्रत्ययावधारणया एतस्योत्पत्तिरप्यवधेयेति ।

**[ख] जीवस्य परिमाणः** –जीवस्य परिमाणसन्दर्भे विविधविचाराः वर्तन्ते । प्रथमः पक्षः अस्य विभुत्वम् अस्ति । वैष्णवदर्शनेऽस्य अणुपरिमाणः प्रसिद्धः । मध्यमपरिमाणवादिनः माध्यमिकबौद्धाः सन्ति । शरीरपरिमाणात्मकः जीवः इति जैनाः अत्र अणुत्वपक्षोऽप्यस्ति । अत्र एका परिचर्चा कार्येति धिया प्रथमः पक्षः अणुत्वम् उपस्थाप्यते – अत्र भोक्तुमशक्यत्वमपरिमाणविशेषत्वम् अणुत्वमायाति । अत्र अण् धातोः शब्दार्थकत्वम्[14] उत प्राणनत्वम्[15] अन्वेति । यदि शब्दत्वमादाय अणुत्व परिचर्चोपस्थाप्यते तर्हि अस्य जीवस्य नित्यानित्यत्वम् इत्येकः पक्षः आयाति यतो हि शब्दाः नित्याः अनित्याश्चः । नित्यत्वपक्षपरकपरिमाणे विभुत्वप्रसंगः, अनित्यत्वपरकपरिमाणे शरीरपरिमाणः अस्तिकायात्मकः माणः अन्वेति । परमत्र अणोरणीत्वप्रसङ्गः समायाति । अयं भावः जीवः अणोः अप्यणुतरःअणीयः अवगन्तव्यः तत्र अणुत्वव्यवस्था तु जालान्तर्गतस्य रजसः आद्यः भागः उत बालाग्रशतभागस्य शतधा कल्पितस्य भागः ग्राह्यो भवति । तथापि तस्य विप्रतिपत्तौ तु “युगपच्छिरः पादयोः वेदना” इति प्रसङ्गस्य उपपत्तिः न स्यात् एवं च

[12]तथैव - अर्हत दर्शनम् पृ. सं. 125

[13]सिद्धान्तचन्द्रोदयः [न्याय श.] पृ. सं. 216

[14]भ्वादिगणः (सि. कौ.) धात्वङ्कः 473, क्रम्यन्ताः

[15]दिलदि - धात्वाङ्कः 1251


©Indira Gandhi National Open University

विभुत्वाग्रहः अत्र ग्राह्यः । तथा च **“पृथगुपदेशात्”**[16]अयं भावः श्रुतौ तस्य परिमाणसन्दर्भे अणोः पृथक् उपदेशः अपि समायाति तत्र जीवपरिकरीभूतस्य वैशिष्ट्यमादाय अणुत्वाद्यारोपः अन्वेयः भवति तथा हि – अङ्गुष्ठमात्रः रविरूपतुल्यः इति ।[17] इति प्रामाण्यादिकादाय यदि अस्य विभुत्वम् उपस्थाप्यते तत्तर्हि किन्तावत् विभुत्वम् इति प्रश्नः समायाति ? अस्य परिमाणत्वपक्षे परममहत् परिमाणवत्त्वम् उपपद्यते ।[18] अन्यच्च ईशादिगुणविशिष्टत्वम् अपि आयाति । अनेन बिम्बवादावधारणा समायाति यत् मायावच्छिन्नं चैतन्यमीश्वरः अन्तःकरणावच्छिन्नत्वं जीवः इति । एवञ्च अणु-विभुमहत्व्याख्याभ्यः अपि समन्वेयः भवति इति ।

**[ग] जीवस्य नानात्वम्** –दर्शनसम्प्रदाये अयं प्रश्नः अस्त्यतीव प्रसिद्धः यत् जीवस्य नानात्वम् उत तदभाववत्त्वम् । अत्रायमंशः एकजीववादः अनेकजीववादः इति पदेनापि अवगम्यते । अत्र वेदान्तेऽपि एकत्ववादः बहुत्ववाद अवगम्यतेऽत्र ।

**एकत्ववादः** –अविद्याप्रतिबिम्बितत्वात् अवस्थादिशून्यतुरीयत्वादयं जीवः एकः इत्यस्य विषयस्य प्रसङ्गः आयाति । अत्र अहं ब्रह्मास्मि तत्त्वसिमहावाक्यस्यान्वयोऽपि हेतुत्वमावहति।

**बहुत्ववादः** –अनेकावस्थायां स्थितत्वात् अन्तःकरणस्य विभिन्नत्वात्, बिम्बप्रतिबिम्बविस्तृतत्वात् अविद्याकर्मपूर्वप्रज्ञा- परिग्रहत्वात् नानात्वम् उपपद्यते ।

परमत्र नानात्वचिन्तने उपाधिरेव हेतुः विद्यते । यथा एकः एव पुत्रः ज्येष्ठः, मध्यमः, कनिष्ठः भवति । राहोः शिरः इत्यस्य षष्ठ्यर्थोत्पत्तिः भवति, अन्तेऽपि स्वान्तत्वम् स्थाप्यते तद्ववदत्रापि उपाधिवशात् तस्य नानात्वम् अस्ति व्यवस्थापितम् अन्यथा एकत्वे हि गतिः आद्यास्ति ।

---

[16]ब्रह्म सूत्रम् 2.3.28
[17]श्वेताश्वतरोपनिषद् 518
[18]न्यायकोशः पृ. सं. 771


©Indira Gandhi National Open University

**[घ] प्रस्थानद्वये जीवः** –अद्वैतनये भामतीप्रस्थानस्य प्रकाशात्मयतिविवृतस्य विवरणप्रस्थानस्य महत्त्वमाधिक्येन वरीवर्ति । अत्र प्रस्थानद्वयघटितः जीवः अस्ति विवेच्यः ।

1. **विवरणप्रस्थानकः जीवः** –ईश्वरप्रतिबिम्बितः जीवो भवति । जीवस्य एकत्वम् अस्ति । जीवः अविद्याश्रयोऽस्ति ।

2. **भामतीप्रस्थानकः जीवः** –जीवाश्रिताविद्यायाः विषयः ब्रह्म अस्ति । जीवः अवच्छेदः वर्तते । अविद्यायाः अनेकत्वात् तदाश्रयभूताः जीवाः भिन्नाः अनेके च भवन्ति । अत्र कल्पतरुकाराः[19] -

**जीवावस्था अविद्यायाः विषयं ब्रह्मशूक्तिवत् ।**

**ऊचे वाचस्पतिर्भाष्यश्रुत्योर्हृदयवेदिता ।।**

अपि च[20] -

**ब्रह्मैव जीवाश्रितयाऽविद्यया विषयीकृतम् ।**

**वाचस्पतिमते हेतुर्माया तु सहकारिणी ।।**

अयं भावः जीवाश्रिता या अविद्या तया अन्वितं ब्रह्म जगतः उपादानत्वमभ्युपैति अपि चात्र माया द्वारकारणत्वम् उत सहकारिकारणत्वं भजति । एवञ्च एतन्नये जीवस्य माहात्म्यमतिशयमस्ति ।

**जीवस्य अवस्थाः** –इह हि अद्वैतनयेऽस्य जीवस्य या अवस्था तस्याः वर्णनं दृश्यते । ताः अवस्थाः अत्र परिचर्च्यन्ते ।

---

[19]सं. वा. वृ. इ. (10 खण्ड) पृ.सं. 90

[20]तथैव - 92


©Indira Gandhi National Open University

**1. जाग्रतावस्था** –अत्र शरीरेन्द्रियपञ्जराध्यक्षो जीवः पदार्थस्य ज्ञानभावम् एति । अन्नमयकोषाबद्धः भोक्तृत्वम्भजति । अत्र इन्द्रियार्थसन्निकर्षस्य प्राधान्यम्भवति तद्वारकमेव सुखादीनामुपलब्धिः अवगम्यते । अत एवास्य कर्मफलभोक्तृत्वम् उपस्थाप्यते । वस्तुतः यथार्थ प्रत्ययप्रवाहावस्था एव जागरणम्भवति ।[21] अत्र जीवस्य मानादिकं संगच्छते । अत्रास्य वैश्वानरत्वम् उपपद्यते । अस्य वैश्वानरस्य व्युत्पत्तिः तु भवतीत्थम्–

क. विश्वेषां नराणाम् नयनात् अस्य वैश्वानरत्वम् ।

ख. विश्वेनराणां कुक्षिस्थानत्वात् वैश्वानरः ।

ग. विश्वान् नरान् नयति = पापपुण्यानुरूपां गति प्रददाति यः सः वैश्वानरः । एतद्रूपं हि – “जागरितस्थानः बहिष्प्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः, स्थूलभूक् इति”[22] अयं हि स्थूलं समधिगच्छति ।[23]अनेनास्य बहिष्प्रज्ञत्वम् अप्युपपद्यते ।

**2. स्वप्नावस्था** –अस्यामवस्थायां जीवत्वघटकीभूतानि इन्द्रियाणि शरीरं च गतिं नाप्नुवन्ति । अत्र जीवः अन्तः प्रज्ञः भवति । अस्यामवस्थायां जीवः तैजसत्वपदमेति । अत्र स्वप्नावस्थात्वं हि “जाग्रत्प्रज्ञानमेकसाधना बहिर्विषयेव अवभासमाना मनःस्पन्दनमात्रा सती तथाभूतं संस्कारं मनसि आधत्ते । तन्मनः तथा संस्कृतं चित्रित इव पटःबाह्यसाधनानपेक्षम् अविद्याकामकर्मभिः जाग्रद्वदभासते इयमेव स्वप्नावस्था”[24]

अत्र जीवः तैजसत्वमेति । अयं हि तैजसः स्वप्नस्थानः अन्तः प्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः प्रविविक्तभुक् भवति ।[25] अत्र अस्याः अवस्थायाः प्रक्रियात्मकं स्वरूपं तु – “परे देवे मनसि एकीभवति”[26] अपि च वास्तविकं रूपं – “न तत्र रथः न च रथयोगः”[27] इति निर्धारयति । वस्तुतः तत्र रथायोगः एव भवति इति ।

---

[21]न्यायकोशःपृ. सं. 291

[22]माण्डूक्योपनिषद् - 3

[23]मा. का. आ. प्र. - 3

[24]मा. उ. शांकरभाष्य - 4 उपरि

[25]मा. उ. - 4

[26]प्र. उ. 4.2

[27]वृ. उ. 4.3.10


©Indira Gandhi National Open University

[3] **सुषुप्त्यवस्था** –अवस्थाद्वयभिन्नावस्थेतीयम् । निद्रानाड्यवच्छिन्न आत्ममनासंयोगे हि तादृशावस्था सुषुप्त्यवस्था उच्यते । नात्र कामना भवति न च स्वप्नदर्शनं भवति । अस्यामवस्थायां ज्ञानशून्यत्वम् उपपद्यते । केचित्तु जीवः प्रज्ञानेनात्मना सम्परिष्वक्तः बाह्यं किंचन वेदनान्तरम् इति । अत्र माण्डूक्योपनिषदः पदजातम्– यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् इति[28]

[4] **तुरीयावस्था** –अत्र सर्वप्रपञ्चस्य उपशमत्वम् उपपद्यते । अस्याम् अवस्थायां जीवः नान्तः प्रज्ञः न बहिष्प्रज्ञः न चोभयप्रज्ञः भवति । शान्तत्वम् अद्वैतत्वञ्चोपद्यते । इयमवस्था एव आत्मा । अस्याः अवस्थायाः इदं रूपम् –

**आदिशान्ता ह्यनुत्पन्नाः प्रकृत्येव सुनिर्वृताः ।**
**सर्वे धर्माः समाभिन्ना अजं साम्यं विशारदम् ।।**[29]

एतस्याः अवस्थायाः अपि चत्वारो भेदाः विस्तृताः वर्तन्ते –
क. जाग्रतः – जाग्रतजाग्रतः, जाग्रतस्वप्नः, जाग्रतसुषुप्तिः, जाग्रततुरीयः
ख. स्वप्नः – स्वप्नजाग्रतः, स्वप्नस्वप्नः, स्वप्नसुषुप्तिः, स्वप्नतुरीयः
ग. सुषुप्तिः – सुषुप्तिजाग्रतः, सुषुप्तिस्वप्नः, सुषुप्तिसुषुप्तिः, सुषुप्तितुरीयः
घ. तुरीयः – तुरीयजाग्रतः, तुरीयस्वप्नः, तुरीयसुषुप्तिः, तुरीयतुरीयः । इति ।
एतावता षोडशावस्थापन्नः जीवः विज्ञेयः ।[30]

**(च) जीवस्य शरीराणि** –अनुवेदान्तदर्शनम् अस्य जीवस्य शरीरत्रयमस्ति प्रसिद्धम् –
1. कारणशरीरम् 2. सूक्ष्मशरीरम् 3. स्थूलशरीरम्

अत्र कः विशेषः, शरीरत्रयावच्छिन्नः जीवः केन वैशिष्ट्येन सम्पद्यतेऽति भावो भवति प्रतिपाद्यः तथा च –

---


[28]मा. उ. 4
[29]मा. का. अलात शान्ति प्रकरणम् 93
[30]सं. सा. का बृ. इ. 10 खण्ड पृ. सं. 9


©Indira Gandhi National Open University

[1] **कारणशरीरम्** –इदं शरीरम् अत्यखिलकारणसमष्टिः । सर्वस्वरूपकारणत्वादिदङ्कारणशरीरमुच्यते । अत्र विवेकचूडामणिकाराः

**“अव्यक्तमेतत् त्रिगुणैर्निरुक्तं तत्कारणं नाम शरीरमात्मनः ।**[31]
**सुषुप्तिरेतस्य विभक्त्यवस्था प्रलीनसर्वेन्द्रियबुद्धिवृत्तिः ।।”**

अस्य जीवस्य इदं कारणं भवति । एतच्चाव्यक्तं सत् त्रिगुणैरुपेतं भवति । सृष्ट्यादौ जीवः एतस्य स्वरूपमाश्रित्य प्रवर्तते । वस्तुतः यदा ब्रह्म स्वगुणैः अज्ञानादिभिः सह भवति तदास्येश्वरत्वमुपपद्यते तस्य कारणत्व -व्यस्थितत्वात् कारणशरीरस्य प्रत्ययः सूपपद्यते । आप्रलयमस्य प्रसिद्धिः भवति । अविद्या एव एतस्य मूलम् उत कारणम् । अस्य वैशिष्ट्यञ्च -




अत्र आनन्दमयकोषस्यावधारणा अपि स्फुरिता भवति । वस्तुतः अस्य अनादित्वे सति भावरूपत्वे सति विज्ञानप्रतियोगिकः अभावः अवगन्तव्यस्तेनास्य विज्ञाननिरपेक्षत्वम् उपपद्यते ।

[31]वि. चू. 122, भा द. वृ. को. - पृ. सं. 1261 खण्ड - 3




©Indira Gandhi National Open University

**अत्र माण्डूक्यकारिकाकाराः –**

**कार्यकारणबद्धौ ताविष्येते विश्वतेजसौ इति ।**

अत्र कार्यकारणभावविचारे कार्यत्वावच्छिन्ना या कार्यता, तन्निरुपिता या कारणता सा सदैव ग्राहया भवति । इयं कारणता सापेक्ष्या विशिष्य ब्रह्मस्वरूपानपेक्ष्यास्ति । एतावता कारणत्वमादाय जायमानं शरीरमत्र कारणशरीरम् उच्यते।

**[ख] सूक्ष्मशरीरम्** –सूक्ष्मशरीरस्य अपरपर्यायः लिङ्गशरीरमस्ति । अत्र जीवस्य लिङ्गनं भवति । अत्रास्य व्युत्पत्तिस्वरूपेण सम्प्रत्ययीकरणमुपस्थाप्यते यत् – “लिङ्गयन्ते = ज्ञाप्यन्ते आत्मसद्भावः यैः तानि लिङ्गानि तैरन्वितानि शरीराणि लिङ्गशरीराणि इति”[32] अथात्र विवेकचूडामणिकारनये एतद्रूपम् -




अत्र पञ्चदशीकाराः –

**बुद्धिकर्मेन्द्रियप्राणपञ्चकैः मनसा धिया ।**

**शरीरं सप्तदशभिः सूक्ष्मं तल्तिङ्गमुच्यते ।।**

एतावता सप्तदशसमवायान्वितं शरीरं लिङ्गशरीरम् उच्यते । सांख्यानुयायिनः अहङ्कारस्याप्यत्रोपस्थितिं स्वीकृत्याष्टादशावयवात्मकं शरीरं सूक्ष्मं प्रतिपादयन्ति परमत्र यदि

[32]वेदान्तसार टीका पृ. 100


Volume 4, Issue 2, 2025, p. 26-48, ISSN 2583-6331
©Indira Gandhi National Open University

महज्जन्यत्वेनान्वयः क्रियते तत्तर्हि सप्तदशत्वमेवास्य शरीरस्य सूपपद्यते । चूडामणिकाराः स्वप्रतिपादने **“वागादिपञ्च श्रवणादिपञ्च”**[33]
उक्त्वा तद्विषयत्वमपि आहुः इति । अत्र तैरस्य अष्टकपुरीत्वम् अपि सूपस्थापितम्

**सूक्ष्मशरीरस्याष्टकपुरीत्वम्**

- **पञ्चकसमुदायः** (5)
  - **ज्ञानेन्द्रियपञ्चकः**
  - **कर्मेन्द्रियपञ्चकः**
  - **प्राणादिपञ्चकः**
  - **भूतपञ्चकः**
  - **ग्राहृयपञ्चकः**
- **अन्तःकरणानि** (1)
  - **बुद्धिः**
  - **मनः**
  - **अङ्कारः**
  - **चित्तम्**
- **अविद्या** (1)
- **कर्म** (1)

एवं रीत्या यदि अनुशील्यते चेत् पुर्यष्टके बहूनां तत्त्वानां समावेशः दृश्यते परं पञ्चदशीकाराः सप्तदशत्वम् अस्योपस्थापितम् इति वैलक्षण्यम् एव ।


**[ग] स्थूलशरीरम्** –सर्वविधजीवप्रत्यययोग्यशरीरं स्थूलशरीरम् अस्ति । अत्र जीवः कलेवरत्वं वृणुते । यत्र मांसमूत्रादीनां प्राधान्यम् अस्ति । स्थूलशरीरम् अवाप्य परप्रत्ययः नाम बाह्यस्वरूपावबोधः स्वसजातीयविजातीयायवोधः भवति । अस्य शरीरस्य धर्माः-जायते, वर्धते, अपक्षीयते प्रभृतयः सन्ति ।

---

[33]वि. चू. 98


©Indira Gandhi National Open University

अत्र मानापमानदयः ज्ञायन्ते । विवेकचूडामणिकारमते इदं निन्द्यम् अस्ति । अस्य चातुर्विध्यम् उपपद्यते -





अत्र पञ्चीकृतस्य स्थूलभूतस्य स्थानम्भवति तेन तुलसीदासाः अलिखन् क्षितिजलपावकगगनसमीरजमिदं शरीरम् । वस्तुतः जीवः अत्र तनुत्वम्, जत्वम्, मृत्युत्वम्, सुखत्वं, दुःखत्वम् आप्नोति । अत्र भोक्तृत्वम् अस्य जीवस्य उपपद्यते ।

वस्तुतः लिङ्गशरीरविषयस्य यदा अविद्यया पूर्वजन्म कर्मणा च सम्पर्कः भवति तदा तस्य सूक्ष्मत्वम् उपपद्यते अतः सशरीरत्वे सति स्थूलत्वम् उपपद्यते इति विवेकः । यद्यपि आचार्याः अब्रुवन् यत् जीवः पञ्चराध्यक्षः परमत्रानुशील्य अवगम्यते यत् अयं तत्राबद्धः कारागारीयसदृशः इति अनुशील्य एव निन्द्यम् इदं सम्पद्यते । अत्र एतेषां शरीराणां गमनागमनम् अपि अस्ति प्रसिद्धम् इति स्थूलशरीरम् ।

**जीवस्य यानत्वम्** – शरीरत्रयापन्नः जीवस्य गमनमतीव सूक्ष्मम् अस्ति । यद्यपि स्थूलशरीरोपेतः जीवः बाह्यपदार्थभुक् सन् गमयति परं ततः प्राक् तदुत्तरे तस्य जीवस्य काव्यवस्था इत्यस्मिन् सन्दर्भे या प्रज्ञेति उपस्थातव्यात्रास्य जीवस्य त्रैविध्यंयानं कीर्तितमस्ति –


©Indira Gandhi National Open University




अत्र जीवः देवयानेन ब्रह्मलोकं गच्छति । पितृयानेन स्वर्गं याति तृतीययानेन जगति भ्रमति । जीवस्य योनि - भ्रमनसाधनं तृतीयम् एवास्ति । सन्दर्भेऽस्मिन् श्वेताश्वतरोपनिषदः व्याख्यानम्[34] -

**“सर्वाजीवे सर्वसंस्थे बृहन्ते**

**अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे ।।**

**पृथगात्मानं प्रेरितारं चमत्वा**

**जुष्टस्ततस्तेनामृततत्त्वमेति ।।”**

अत्र हंसपदेन जीवः स्वीकर्तव्यः । तेन अयम्भ्राम्यते । तस्य एव दयया अमृततत्त्वम् एति । अत्रास्य पाञ्चभौतिकम् अधिकरणम् अप्युपद्यते । अत्र ब्रह्मसूत्रस्य चतुर्थाध्यायघटकद्वितीयपादे एका परिचर्चास्ति यत् मनः प्राण; तस्मिन् जीवे अवतिष्ठति अपि च यदा मृत्युः भवति तदा जीवः नेत्राभ्यां ब्रह्मरन्ध्रेण बहिरागच्छति । अयं जीवः यदा बहिः आगच्छति तदा तस्य क्वस्थितिः इत्यपि प्रश्नः जायते तस्य उत्तरे भगवता वादरायणेन उक्तम् – “भूतेषु तच्छ्रुतेः”[35] अयं भावः पाञ्चभौतिकः पदार्थः यदा पञ्चभूतेषु व्यवस्थितः तदा

[34]श्वे. उ. 1.6

[35]ब्र. मू. 4.5


©Indira Gandhi National Open University

एव सेन्द्रियमनसा सहजीवः अपि तत्र तिष्ठति । वस्तुतः शरीराग्रहणात् प्राक् उत्तरे च तस्य तादवस्थ्यम् एव विद्यतेऽत्र कठः –

**“अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः ।**
**ताभिः सार्धमिदं सर्वं सम्भवत्यनुपूर्वशः ।।”**[36]

वस्तुतः देवयानासन्नात् प्राक् जीवस्य तत्संस्थत्वम् उपपद्यते यतो हि सूक्ष्मशरीरस्य एवामृततत्वलाभः । अपि च सः जीवः ततः प्राक् भ्रमति भ्राम्यते च । अतः उत्तरकाले ब्रह्मरन्ध्रात् [सुषुम्णायाः नाड्याः] निस्सरति । ततः ओम् इत्युचारयन् रश्म्यनुसारी भवति । एतत्परम्परया अस्य देवयानत्वम् उपपद्यते । जीवनमृत्वयानत्वं तु तस्य जीवस्य कर्मभोगापन्नोऽस्ति । पितृयान त्वं हि पितृलोकं गमयति । एषैव जीवस्य यानव्यवस्था ।

**[ज] पञ्चकोशस्य जीवत्वम्** –गौडकारिकीयाद्वैतप्रकरणे पञ्चकोशस्य जीवत्वम् उदाहृतम् अत्र च हेतु[37] -

**रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके ।**
**तेषामात्मा परो जीवः खं यथा संप्रकाशितः ।।**


एतदुपरि भाष्यकाराः आलिखन् यत् – “पञ्चापि कोशाः आत्मवन्तः अन्तरतमेन सहि सर्वेषां जीवन-निमित्तत्वं जीवः भवति” अतः अत्र जीवत्वस्य व्युपस्थापनाय पञ्चकोशावधारणा उपादेयात्र तद्रूपम् –

---

36कठ. उ.

37गौ. का. अद्वैत प्रकरण श्लोक सं. 11, पृ. 136


©Indira Gandhi National Open University




**अत्रादौ भवचक्रक्रमः** –पञ्चकोशात्मकस्य जीवस्य स्वरूपोपादनात् प्राक् इह तैत्तिरीये एषः क्रमः उपस्थापितोऽति तच्चोपादेयः[38] -

आत्मनः → आकाशः →वायुः→ अग्निः → आपः→पृथ्वी →ओषधयः अन्नम् → पुरुषः → इति ।

**क. अन्नमयत्वम्** –अन्नात् प्रजाः भवन्ति । तेन जीवन्ति अपि च अन्ने एव यान्ति । इदमन्नं हि भूतानां ज्येष्ठम् अस्ति । अत्र इदम् अवधेयं यत् अन्नेन सः जीवः न तु भवति न च याति । परं तेन शरीरस्य स्वरूपम् आयाति । तच्च स्थूल-शरीर वस्तुतः अन्नेन भूत्वा तेन अभिवृद्धिं प्राप्य यच्च विलीयते सः कोशः अन्नमयः ।

अत्रेदम् अनुसन्धेयमस्ति यत् बौद्धाः तस्यान्नवर्धितस्य शरीरस्य आत्मा स्वीकुर्वन्ति तन्न । यद्यपि अन्नस्य महत्त्वम् अस्ति तथापि तेन वर्धितस्य विषयस्य स्वरूपं त्वक्ॎचर्ममांसरुधिरादिॎत्वेन परिगम्यते ।

वस्तुतः यथा छायाशरीरम्, दर्पणशरीरम्, स्वप्नशरीरम्, मानसशरीरम्, आत्मतत्त्वहीनं विहीनं भवति तथैवात्र जीविते अन्नमये शरीरेऽपि-तन्न भवति । तथापि मुख्यव्यवहारः तु अवधेयः एव ।

---

38 ईशादि नौ उपनिषद् (सं. 2066) तै. उ. –मं. सं. – 2.1 पृ.सं. 345


©Indira Gandhi National Open University

एवञ्च अन्नात् नाम अन्नजात् वीर्यात् समुत्पन्नः तेन वर्धितः यः देहः सः अन्नमयः ।

**ख.** **प्राणमयत्वम्** –अत्र अन्नमयात् देहात् भिन्नः प्राणमयः कोशः भवति । अनेन प्राणमयकोशेन सः परिपूर्णः भवति ।[39] अत्र प्राणस्य खगत्वम् उपस्थापितम् अस्ति अत्र प्राणीदानाम् अवयवत्वेन कल्पनमस्तीत्थम् –

| | | |
|---|---|---|
| प्राणः | शिरः | → |
| व्यानः | दक्षिणपक्षः | → |
| अपानः | उत्तरपक्षः | → |
| आकाशः | आत्मा | → |
| पृथिवी | पुच्छम◌् | → |

अत्र इदं सूक्ष्मशरीरम् एव अस्ति । यच्च स्थूलशरीर◌ावच्छिन्नम्एव । तेन चेयम् प्राणमयकोशावधारणा अन्विता भवति –

1. कर्मेन्द्रियैः सह प्राणादिपञ्चकं प्राणमयः कोशः ।
2. कर्मेन्द्रियैः पञ्चभिः अन्वितोऽयं प्राणः प्राणमयः कोशः ।
3. प्राणादि-चतुर्दश-वायुभेदाः अन्नमयैः कोशेः सह वर्तन्ते सदा प्राणमयः कोशः ।

अत्र च अस्य स्वरूपम् तु इत्थम् अस्ति यत् कर्मेन्द्रियम् + प्राणपञ्चकम् = प्राणमयः कोशः इति ।

---

[39] तथैव –मं.सं. - 2.2 पृ.सं. 346



©Indira Gandhi National Open University

अयं हि प्राणमयः कोशः पञ्चकोशेषु द्वितीयः तथा च – अन्नमयकोशः – प्राणमयकोशः – मनोमयः कोशः

अयं भावः विकासक्रमे द्वयोः मध्यवर्तित्वम् अस्यइति । प्राणमयः कोशः तच्च आयुष्यम् तथा च - प्राणो हि भूतानाम् आयुः इति ।[40] एवञ्च अन्नमये सञ्चारत्वभूमिकायाम् अस्य प्राणमयस्य कोशस्य स्वरूपम् अवगम्यते ।

**मनोमयः कोशः** –तत्र मनोमयः कोशः प्राणमयात्, अन्नमयामयात् चान्यः वर्तते । मनोमयेन इदं शरीर भवति पूर्ण-शरीरम् । अस्य स्वरूपम् -

**मनोमयः कोशः**[41]





अत्र मनोमयस्य कोशस्य सामान्यरूपेण अनुशीलनं क्रियते चेत् वाङ्मयत्वं अस्य संगच्छते। **विज्ञानमयः कोशः** –मनोमयात् अन्यः आत्मा विज्ञानमयः वर्तते । यदाप्यन्यत्वञ्च तद्भिन्ने सर्वत्र परं अत्र क्रमशः क्रमादर्थमादाय मनोमयः कोशः स्वीक्रियते । अस्य स्वरूपम् –

[40]ईशादि नौ उपनिषद् (सं. 2066) तै. उ. गीताप्रेस गौरखपुर (उ.प्र.) मं. सं. – 2.3 पृ.सं. 35

[41] तथैव – मन्त्र संख्या 2.3, पृ. सं. 35




©Indira Gandhi National Open University




अत्र नैतिकः भावः आयाति एवञ्च अन्नमये शरीरम्मनोमये वाङ्मयम् विज्ञानमये नैतिकः भावः प्रतिष्ठितो वर्तते ।
विज्ञानम् यज्ञं साधयति । तच्च द्यौतनस्वभाववत् अस्ति । तद् ब्रह्म अस्ति । तच्च सर्वान् कामान् समश्नुते इति।

**आनन्दमयः कोशः** –आनन्दमयः कोशस्य सत्वे अयं हि जीवः पूर्णः भवति । अनेन पुरुषः पुरुष-विधो भवति अस्य स्वरूपम्





©Indira Gandhi National Open University

इति आनन्दमयः कोशः ।

ननु अत्र विचार्यते आदौ यत् पञ्चविधानां कोशानां यच्च शारीरिकं रूपं तत् वास्तविकम् उत औपनिषदः कल्पनोपेतम् इतिरित्या उत्तरयति यत् उपासकसौगम्याय एतद्रूपम् अत्र प्रतिष्ठापितम् इति।

एतेषां पञ्चकोशानां सामञ्जस्यात् जीवस्य अवधारणा समुदितास्ति ।
अत्र अयं जीवः जातः अजातो वा इति प्रश्नस्य समापनम् अनिष्पन्नमेव तदनु अत्र उद्भाव्यते यत् – "द्वैतवादिनः अजातस्य आत्मतत्त्वस्य जातम् इच्छन्ति तन्न समीचीनम् यतो हि सः अजातः अमृतश्च वर्तते । एतच्च प्रकृतिसिद्धम् ।" ननु यदि अयम् अजीवः, अमर्त्यः तर्हि अस्य प्रकाशः कथम् तदा उत्तरयति –

**स एष नेति नेतीति व्याख्यातं निह्नुते यतः ।**

**सर्वमग्राह्यभावेन हेतुनाजं प्रकाश्यते ।।**[42]

एवञ्चास्य नेति इति प्रतिषेधभिन्नत्वव्यवस्थाया परिप्रकाशः जायते ।

अत्र अयं जीवः शरीरेन्द्रियसमूहाध्यक्षः कर्मफलभुक् भवति । परमत्र जीवस्य कथं प्रत्यक्षः इतिरीत्या शरीराद्युपाधिभिरत्र प्रत्यक्षम् विषयेऽस्मिन् इदं तैत्तिरीयम् स्वरूपम्[43] अस्य समग्रं पक्षम् उद्धाटयति

---

[42] गौडपादाचार्याः (2000) उद मु. गौडकारिका गीताप्रेस गौरखपुर, उ.प्र. अद्वैतप्रकरणम् – 26, पृ.सं. 161
[43]भारतीय दर्शनम् प.भू.आ. बलदेव उपाध्याय (2008), भारतीय दर्शन. पृ. सं. 362


©Indira Gandhi National Open University

| क्रमः | शरीरम् | अभिमानी | कोशः | अवस्था |
|---|---|---|---|---|
| 1. | स्थूलशरीरम् | वैश्वानरः (विराट्‌ विश्वः) | अन्नमयः | जाग्रत् |
| 2. | सूक्ष्मशरीरम् | सूत्रात्मा<br>हिरण्यगर्भः, तैजसः | मनोमयः<br>प्राणमयः<br>विज्ञानमयः | स्वप्नावस्था |
| 3. | कारणशरीरम् | तैजसः<br>प्राज्ञः<br>ईश्वरः | विज्ञानमयः | सुषुप्तिः |

एतदेव जीवः अजः शुद्धः नेति नेति रीत्या प्रत्यक्षः शान्तः वर्तते । अत्र उपरि तालिकायाम् अस्यााः विकास-प्रक्रियायाः उत अङ्गस्य पक्षस्य वा विस्तारोऽस्ति ।

**(ञ) समीक्षा** –जीवनप्रत्ययत्वविशिष्टस्य जीवस्य सम्प्रत्ययत्वोपादाने यथावेदान्ततत्त्वमिद मनुसन्धान प्रपत्रम् अस्ति अत्रादौ आत्मनः जीवत्वम्, शरीरेन्द्रियपञ्जराध्यक्षत्वम्, कर्मफलसम्बन्धित्वञ्च जीवप्रत्ययः प्रतिपादितः । अत्र जीवस्य आत्मनः जीवाख्यत्वेऽपि व्यपदेशः विधीयते । वस्तुतः तयोः भिन्नता अस्ति । यानाश्रितत्वादस्य पञ्जराध्यक्षत्वम् अस्त्येव । अनेन ब्रह्मणः पदार्थस्य चास्तित्वम् । अस्य चैतन्यबिम्बप्रतिबिम्बित्वम् अप्यस्ति प्रसिद्धम् । अस्य यावत्यः परिभाषाः सन्ति तासु श्रीमदाद्यशङ्करवचनस्य सुरभिः अस्त्येव,


©Indira Gandhi National Open University

उत ताः सर्वाः अन्तर्निहिताः भवन्त्यत्र । अस्य परिमाणत्वनिरुपणे विभुत्वोपस्थापने अन्वादीनां सामञ्जस्यं समायाति । अयमेकः बहुत्व विशिष्टो वात्र उपाध्यवच्छिन्ने बहुत्वकल्पनम् उपपद्यते । एकत्व बहुत्वादि परक प्रस्थान भेदः [भामतीविवरणभेदः] समुपलभ्यते । अस्यावस्थायाः नैजं वैशिष्ट्यम् अस्ति । अत्र षोडशावस्थायाः सङ्कल्पः अस्ति सूक्ष्मः । अस्य शरीरत्रयसूक्ष्मविषये पञ्चदशी-चूडामणि विचार वैमत्य मायाति । तत्र सप्तदशत्वस्य पुर्यष्टकस्य च वैभिध्यम् अट्टयम् अस्ति । अस्य ब्रह्मचक्रभ्रमणम् उपपद्यते । कोशावधारणास्य प्रतिपक्षं बोधयति । ततोऽस्य अद्वैतत्वम् एव शिवत्वं सङ्गच्छते इति जीवसमीक्षेति दिक् ।

**सन्दर्भग्रन्थाः –**


1. अमरकोशः
2. अष्टाध्यायी
3. न्यायकोशः
4. वाचस्पत्यम्
5. शब्दकल्पद्रुमः
6. ब्रह्मसूत्रम्
7. शाङ्करभाष्यम्
8. पञ्चदशी
9. विवेकचूडामणिः
10. उपनिषद्
11. गौडकारिका




©Indira Gandhi National Open University

12. माण्डूक्योपनिषद्
13. संस्कृतवाङ्मय का वृहद् इतिहास
14. वेदान्तसारः
15. भारतीय दर्शन
16. भारतीय दर्शन का वृहत् कोश


©Indira Gandhi National Open University